# SANSKRIT

**(Second Language)**

**(*Three hours*)**

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first **15** minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

*This paper comprises of **two** Sections; **Section A** and **Section B.***
*Attempt **all** the questions from **Section A** .*
*Attempt **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and **any two** other questions from the same books you have compulsorily chosen.*
*The intended marks for questions or parts of questions are given in brackets [ ].*

**SECTION—A (40 Marks)**

*Attempt **all** questions*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु **एकं** विषयम् आधृत्य **150-200** शब्दपरिमितं निबन्धं **संस्कृतभाषया** लिखत :—

**(i)** ग्रन्थालयः ज्ञानस्य भाण्डागारं वर्तते।

**(ii)** संस्कृतभाषायाः गरिमाणं वर्णयत।

**(iii)** परिसरनाशस्य कारणानि तथा दुष्परिणामाः च।

**(iv)** धार्मिकोत्सवेषु एकस्योत्सवस्य परिचयः।

**This Paper consists of 7 printed pages and 1 blank page.**



© *Copyright reserved.*

Downloaded From www.icseboard.org

**(v)** (Picture Composition) प्रस्तुत चित्रम् आधृत्य संस्कृतभाषया एकं लघुनिबन्धं लिखत :—



## Question 2

Write a letter in **Sanskrit** on any **one** of the following topics :— [7]

अधोलिखितयो: विषययो: **एकं** विषयम् आधृत्य पत्रमेकं **संस्कृतभाषया** लिखत :—

**(i)** भवान्/भवती सूक्तं कारणम् उक्त्वा शालात: स्थानान्तरप्रमाणपत्रं प्रार्थयित्वा मुख्योपाध्यायं प्रति पत्रं लिखत।

**अथवा**

**(ii)** मित्रै: सह गतशालाप्रवासं वर्णयित्वा मातरं प्रति पत्रं लिखत।

Downloaded From www.icseboard.org

## Question 3

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

अधोलिखितम् अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि यथासंभवं स्वशब्देषु **संस्कृतभाषया** देयानि :—

कश्चन बालक:। तस्य पिता नितरां निर्धन:। बालक: अध्ययनं कर्तुम् इच्छति। किन्तु यस्मिन् गृहे उदरपूरणसमस्याया: एव उत्तरं न स्यात् तत्र तस्य अध्ययनाय व्ययस्था कथं भवेत् ? अत: विद्यालयं गच्छत: स्वसमवयस्कान् इतरान् बालान् दृष्ट्वा स: दीर्घं निश्वसिति।

स: बालक: विनयशील:, स्नेहपर:, मृदुभाषी, उत्साहस्य प्रतिमूर्ति: च। पित्रा सह कार्यं कुर्वन् एव स: बहूनां बालानां मैत्रीं सम्पादितवान्। ते बाला: तम् अक्षराणि अपाठयन्। अङ्गुल्या धूलौ लिखन् अक्षराभ्यासं कृतवान्। एवं शब्दवाक्यज्ञानादिकमपि प्राप्तवान्।

पुत्र: विद्यालयं प्रति प्रेषणीय: इति पितु: तीव्रा इच्छा। अत: अधिकधनसम्पादनाय पुत्रेण सह कलकत्ता नगरं प्रति प्रस्थितवान्। रेल् यानेन गमनाय धनं नासीत् इति कारणत: तौ पादाभ्यामेव प्रस्थितवन्तौ। मध्याह्नपर्यन्तं चलित्वा तौ श्रान्तौ कस्यचित् वृक्षस्य अध: उपविष्टवन्तौ। श्रान्त: पिता अवदत् — 'न जानामि, आवाभ्यां कियत् दूरम् आगतम्' इति। तदा पुत्र: अवदत्— 'आवां विंशतिमैल् दूरम् अतिक्रान्तवन्तौ' इति। 'तत् त्वया कथं ज्ञातम् ?' — पिता आश्चर्येण अपृच्छत् ? 'मार्गपार्श्वे शिलासु दूरं लिखितं भवति'। तत् मया अवलोकितम् तेन तत् ज्ञातम् इति पुत्र: अवदत्।

पुत्रस्य तीक्ष्णमतित्वं दृष्ट्वा पिता नितरां सन्तुष्ट:। 'अयं कथमपि विद्यालयं प्रति प्रेषणीय: एव। तदर्थं ग्रामपरिसर: एव उचित:' इति निश्चित्य स: नगरं प्रति गमनस्य चिन्तनं परित्यज्य ग्रामं प्रत्यागच्छत्। ग्रामे स्वयं परिश्रमं कुर्वन् उपवासादिकम् आचरन् पुत्रं विद्यालयं प्रति प्रेषितवान्।

ग्रामविद्यालये अध्ययनं समाप्तम्। अग्रे कथमिति पितु: चिन्ता। 'भवान् नगरे यस्मिंश्चित् विद्यालये मम प्रवेशं कारयतु। अहं भृतकादिकार्यं कुर्वन् मम व्ययार्थं धनं सम्पादयामि' इति पितरम् अवदत् स: बालक:। तदनुगुणं पिता पुत्रं नगरीयविद्यालयं प्रति प्रेषितवान्। तत्र अयं बालक: श्रद्धया पठन् सर्वेषाम् अध्यापकानां प्रिय: जात:। सर्वेषां साहाय्येन विद्यार्थिवेतनादिकं प्राप्य च स: अध्ययनम् अनुवर्तितवान्। कलकत्ता संस्कृतविद्यालये पठन् स: व्याकरणे, साहित्ये, धर्मशास्त्रे, वेदान्ते च प्रावीण्यं प्राप्तवान्। तस्य पाण्डित्यं दृष्ट्वा कलकत्तविद्वन्मण्डली तस्मै 'विद्यासागर:' इति उपाधिं प्रादात्। स: पोर्टविलियं महाविद्यालये प्राध्यापकत्वेन नियुक्तिं प्राप्तवान्। स एव ईश्वरचन्द्रविद्यासागर:।

**(i)** बालक: कीदृश: आसीत् ? स: कथम् अक्षराभ्यासं कृतवान् ? [2]

**(ii)** पिता पुत्रश्च किमर्थं कलकत्तानगरं प्रस्थितवन्तौ ? [2]

**(iii)** कियत् दूरम् आगतमिति पुत्रेण कथं ज्ञातम् ? [2]

**(iv)** ग्रामविद्यालये अध्ययनानन्तरं पुत्र: पितरं किमवदत् ? [2]

**(v)** स: केषु विषयेषु प्रावीण्यं प्राप्तवान् ? किमिति उपाधिं प्राप्तवान् च ? [2]



Downloaded From www.icseboard.org

**Question 4**

Answer the following questions according to the instructions given :—

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरयत :—

**(i)** कोष्ठान्तर्गतस्य शब्दस्य उचितरूपं निर्माय रिक्तस्थानं पूरयत :— [1]

(अ) ____________ आम्रफलं रोचते। (बालक)

(आ) प्रतिदिनं ___________ प्राक् देवं स्मरतु (शयन)

**(ii)** अनयो: वाक्ययो: दोषं निवारयत :— [1]

(अ) वायुना अन्तरा जीवनं नास्ति।

(आ) वृक्षान् उपरि खगा: नीडं रचयन्ति।

**(iii)** वाच्यपरिवर्तनं कुरुत :— [1]

(अ) तया देव: दृश्यते।

(आ) सेवक: भारं नयति।

**(iv)** प्रकृति-प्रत्ययं विभजनं कृत्वा लिखत :— [1]

(अ) ज्ञात्वा

(आ) प्रविश्य

**(v)** सन्धि-विच्छेदं कुरुत :— [1]

(अ) रजताद्रि:

(आ) सद्विद्या

**(vi)** केवलं समासविग्रहं कुरुत :— [1]

(अ) उपवनम्

(आ) नरभक्षका:

**(vii)** अच् प्रत्याहारे विद्यमानवर्णान् लिखत। [1]

**(viii)** लृट् लकारे परिवर्तनं कुरुत :— [1]

(अ) वृक्ष: छायां ददाति।

(आ) अहं सत्यं वदामि।

Downloaded From www.icseboard.org

## SECTION—B (40 Marks)

*Questions from only* ***two*** *of the following textbooks are to be answered.*

*Attempt* ***four*** *questions from this Section.*

*You must answer at least* ***one*** *question from each of the* ***two*** *books, you have studied and any* ***two*** *other questions from the same books that you have chosen.*

### संस्कृतवाणी—भाग-4
### आचार्य देवो भव

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि**संस्कृतभाषया** देयानि :—

आचार्यः न केवलं लौकिक-विषयान् बोधयति परन्तु बोधनसमये छात्रेभ्यः सदाचारस्य, सम्यक् वाचः, सम्यक् आलोचनस्य अपि विशेषं गमनं ददाति। आचार्यस्य प्रत्येकं क्रिया छात्रे तीव्रं प्रभावं जनयति।

**(i)** अध्यापकः छात्राणां कृते किं किं करोति ? [2]

**(ii)** महापुरुषाः समाजे किं किं कुर्वन्ति ? [2]

**(iii)** गुरोः गौरवार्पणेन सेवया च किं भवति ? [3]

**(iv)** पूर्वं भारते गुरुम् अतीव महत्त्वमासीत्। कुतः ? [3]

### प्रार्थना

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि**संस्कृतभाषया** देयानि :—

वैदिक वाङ्मयस्य सारभूतो भागोऽस्ति उपनिषत्। अतः एवास्याः वेदान्तः इति नामान्तरं प्रसिद्धम्। वेदस्य निर्णयात्मकः भागः अयमिति अन्तपदस्यार्थः।

**(i)** उपनिषदः मानवानां किं कुर्वन्ति ? [2]

**(ii)** कीदृशे नरे कर्म न लिप्यते ? [2]

**(iii)** कीदृशं पदम् ओमिति ब्रुवन्ति ? [3]

**(iv)** न तत्र सूर्यो भाति न चन्द्रतारकम्
नेमा विद्युतो भान्ति कुतोयमग्निः
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति। अस्य तात्पर्यं लिखत। [3]



Downloaded From www.icseboard.org

## अस्माकं देश:

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि**संस्कृतभाषया** देयानि :—

भारतदेश: पुण्यभूमि: धर्मभूमि: इति प्रसिद्ध:। अस्य विभिन्न प्रदेशेषु सर्वधर्मीयाणां सकलमतावलम्बिनां बहूनि तीर्थक्षेत्राणि सन्ति। मन्दिराणां, मस्जिदानां गुरुद्वारादीनां सन्दर्शनं धार्मिकतृप्तिं जनयति।

**(i)** विदेशीया: किमर्थं भारतदेशम् आगच्छन्ति ? [2]

**(ii)** भारतस्य प्राचीनं नाम किम् ? अस्य सीमाभागं वर्णयत ? [2]

**(iii)** कीदृशानि प्रयोजनानि पवित्रस्थानानां दर्शनेन भवन्ति ? [3]

**(iv)** भारतदेशं प्रति महत्त्वपूर्णं कार्यं किं भवेत् ? [3]

## संस्कृतवाणी—भाग-5

## युक्ति: शक्ते: गरीयसी

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि**संस्कृतभाषया** देयानि :—

कुशाल: नाम युवकेन अस्य राक्षसस्य क्रूर कृत्यानि श्रुतानि। स: युवक: तं मारयितुं ग्रामवासिन: जनान् मृगान् च तस्मात् रक्षितुं निश्चयं कृतवान्। एतदर्थं स: तत् वनं प्राविशत्। अनेकदिवसेभ्य: अन्वेषणात् अनन्तरं स: राक्षसस्य आवासं दृष्टवान्।

**(i)** कुशाल: किमर्थं वनं प्राविशत् ? [2]

**(ii)** वनमृगा: ग्रामीणजना: च किमर्थं दु:खिता: आसन् ? [2]

**(iii)** कुशाल: स्वसकशेथतं दर्पणं किमुक्त्वा राक्षसाय दर्शितवान् ? [3]

**(iv)** राक्षस: दीनस्वरेण कुशालं किमिति प्रार्थितवान् ? [3]



Downloaded From www.icseboard.org

## अमृतवाहिनी

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि**संस्कृतभाषया** देयानि :—

सुभाषितं नाम सुवचनम् इत्यर्थः। संस्कृतवाङ्मये सुभाषितानां महत्त्वं स्थानं वर्तते। बहवः सुभाषितकाराः बहूनि सुभाषितानि रचितवन्तः सन्ति। तानि अस्मान् व्यवहारचातुर्यं बोधयन्ति। तत्त्वं च उपदिशन्ति।

**(i)** के स्थानमुत्सृज्य गच्छन्ति ? के तत्रैव निधनं यान्ति ? [2]

**(ii)** पशूनां भागधेयं किम् ? [2]

**(iii)** सन्तः कीदृशाः भवन्ति ? [3]

**(iv)** सुभाषितकारस्यानुसारेण परमं भूषणं किम् ? कुतः ? [3]

## चतुरः रामकृष्णः

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि**संस्कृतभाषया** देयानि :—

रामकृष्णः व्याधिग्रस्तानां जनानां चिकित्सां करोति स्म। एतदर्थम् औषधस्य अन्वेषणार्थं सः वनं गच्छति स्म। एकदा सः औषधीय-वस्तूनि आनेतुं वनं गतः। तस्मिन् वने नरभक्षकाः अपि अवसन्। ते वनागतान् जनान् गृहीत्वा खादन्ति स्म। अतः जनाः तद्वनप्रवेशस्य विचाराद् एव भीताः भवन्ति स्म।

**(i)** कृष्णदेवरायः कः ? तस्य सभा कीदृशी आसीत् ? [2]

**(ii)** रामकृष्णः किमर्थं वनम् अगच्छत् ? सः किमिति विख्यातः आसीत् ? [2]

**(iii)** नरभक्षकनायकः उच्चस्वरेण रामकृष्णं प्रति किमवदत् ? [3]

**(iv)** नायकः रामकृष्णाय गृहं गन्तुं किमर्थम् अनुमतिं दत्तवान् ? [3]

Downloaded From www.icseboard.org